International Journal of Sanskrit Research 2024; 10(4): 141-146

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 141-146
© 2024 IJSR
www.anantaajournal.com
Received: 15-04-2024
Accepted: 16-05-2024

**ड.प्रदीप्तकुमारनन्दः**
सहाचार्यः सर्वदर्शन
विभागः श्रीजगन्नाथ
संस्कृतविश्वविद्यालयः,पुरी,
ओडिशा, भारत

Corresponding Author:
**ड.प्रदीप्तकुमारनन्दः**
सहाचार्यः सर्वदर्शन
विभागः श्रीजगन्नाथ
संस्कृतविश्वविद्यालयः,पुरी,
ओडिशा, भारत

# जैनदर्शने ज्ञानविवेचनम्

ड. प्रदीप्तकुमारनन्दः

**सारांश**
अहिंसाधर्मः जैनागमे तीर्थं शास्त्रमुपायं वा । तमुपदेष्टारः चतुर्विंशति तीर्थंकराः। ऋषभदेव-जित- सम्भव- अभिनन्दन- सुमति- पद्य- सुपार्श्व- चन्द्रप्रभ- पुष्पदन्त- शीतल- श्रेयांस-वासुपूज्य-विमल- अनन्त- धर्मनाथ- शान्ति- कुन्थु- अरह- मल्लिनाथ- मुनिसुव्रत- नमि-नेमि- पार्श्वनाथ-वर्धमानभेदात् (महावीरः) भिद्यन्ते। जैनदर्शनस्य उद्गमक्षेत्रं एतेषामुपदेशः यस्तु जिनशासन-जिनागम-जिनश्रुत-द्वादशांग-जिनप्रवचनानीति नाम्ना परिचीयन्ते। तीर्थंकरेषु आदिमः ऋषभदेवः। जैनशासनेऽसौ प्रजापतिः। आदिब्रह्मा, आदिनाथः, बृहद्देवः, पुरुदेवः, नाभिसूनुः वृषभश्च नाम्नापि असौ परिचितः। अस्य पितुर्नाम नाभिरायः माता च मरुदेवी आस्ताम्। आभारताधिपतेः ऋषभस्य भरतनाम्ना पुत्र आसीत्। यन्नाम्ना भारतवर्षं जातम्। अन्ते ऋषभो विरक्तः सन् दिगम्बरोऽभूत्। असौ मोक्षमार्गस्य प्रथमो वक्ता आदिमतीर्थंकररूपेण जैनागमे महामान्यः। अस्य जैनागमसिद्धान्ते जैनदर्शनसारः मया प्रस्तूयते।

**कूटशब्द** : अहिंसा, तीर्थंकरः, महावीरः, ज्ञानम्, अवग्रहः, प्रत्यक्षम्, शीलम्

## प्रस्तावना

भगवान् महावीरः जैनधर्मस्य चतुर्विंशतितमः (२४) तीर्थंकरः आसीत्। भगवतो महावीरस्य जन्म ख्रीष्टात् ५२६ वर्षपूर्वं वैशालीगणराज्यस्य कुण्डग्रामे इक्ष्वाकुवंशस्य क्षत्रियराजा सिद्धार्थस्य राज्याः त्रिशालायाश्च गर्भे चैत्रशुक्लचतुर्दश्याम् उत्तराषाढनक्षत्रे मध्यरात्रौ अभूत्।[1] अस्य जन्मनः पश्चात् राज्ये प्रगतिकारणात् वर्धमान नाम्नाऽसौ परिचितः।

त्रिंशत् वर्षे महावीरः जगतः विरक्तः भूत्वा राजवैभवं त्यक्त्वा संन्यासं स्वीकृत्य आत्मज्ञानमार्गं प्रस्थितवान्। १२ वत्सरकठोरतपसः अनन्तरं ४२ तमे वयसि केवलग्यानं प्राप्तवान्। ज्ञानप्राप्तेः त्रिंशद्वर्षाणि इतस्ततः परिभ्रन्य ज्ञानं प्रसारितवान्। आश्विन-मासस्य कृष्णपक्षस्य अमावास्यां तिथौ स्वाति-नक्षत्रे

[1] तीर्थङ्कर चरित्र, मुनि सुमेरमल (लाडनूं) पृ. १९२

पावापुरी-नामके नगरे भगवतः महावीरस्य निर्वाणम् ७२ वयसि अभवत् ।[2] भगवान् महावीरः त्रिकालज्ञानी आसीत्। अतः पूर्वमेव तस्मै निर्वाणसमयस्य ज्ञानम् अभवत्। भगवता सह बहवो मुनयः मोक्षप्राप्ताः आसीत् पार्श्वनाथस्य निर्वाणानन्तरं सार्धद्विशतं वर्षाण्यनन्तरं भगवतः महावीरस्य मोक्षः अभवत्।

दिगम्बरपरम्परानुसारं महावीरः बालब्रह्मचारी आसीत्। भगवान् महावीरः विवाहं कर्तुम् नेच्छति स्म यतो हि ब्रह्मचर्यं तस्य प्रियविषयः आसीत्। तस्य भोगेषु काचित् रुचिः नासीत्। अन्ते पितृमातृप्रस्तावम् अङ्गीकृतवान् सः। [3] श्वेतांबरपरम्परानुसारं यशोदानाम्नी सुकन्या तस्य पत्नी आसीत्। दम्पतीभ्यां प्रियदर्शिनीनाम्नी कन्या जाता, यस्याः विवाहः राजकुमारेण जमालि इत्यनेन सह संजातः।[4]

जैनग्रन्थानुसारं तीर्थंकराः काले काले धार्मिकतीर्थयात्रायाः प्रवर्धनार्थं जायन्ते, ये सर्वेभ्यः जीवेभ्यः आध्यात्मिकसुखप्राप्तेः मार्गं वदन्ति। यदा हिंसायाः, पशुबलेः, जातिभेदस्य च प्रबलता आसीत्, तदा भगवतो महावीरस्य जन्म अभवत्। सः जगति सत्यस्य अहिंसायाः च पाठं पाठितवान्। तीर्थंकर महावीर स्वामी अहिंसां सर्वोच्चं नैतिकगुणं वर्णितवान्। तेन जैनधर्मस्य, अहिंसा, सत्यम्, अपरिग्रहः, अस्तेयः, ब्रह्मचर्यमीति पञ्चशीलसिद्धान्ताः उक्ताः। अनेन अनेकान्तवादः, स्याद्वादः, इत्यादयः विशेषसिद्धान्ताः प्रचारिताः।

भगवता महावीरेण त्रयोदशवर्षाणि यावत् साधना कृता। त्रयोदशेषु वर्षेषु महावीरः बहूनाम् उपसर्गानां कष्टम् अन्वभवत्। त्रयोदशवर्षाण्यन्तरं भगवान् महावीरः विचरन् जम्भिय-ग्रामं प्राप्तवान्। तस्य ग्रामस्य समीपम् ऋजुबालुका-नदी आसीत्। तस्यां नद्यां घोषे एकं क्षेत्रम् (Farm) आसीत्। श्यामक-नामकः कश्चन गाथापतिः तस्य क्षेत्रस्य स्वामी आसीत्। तस्मिन् क्षेत्रे शालवृक्षस्याधः एव भगवान् ध्यानावस्थां गतः।

वैशाख-मासस्य शुक्लपक्षस्य दशम्यां तिथौ उत्तराफाल्गुनी-नक्षत्रे महावीरः कैवल्यज्ञानं प्रापत्। भगवतः रहस्यकालस्य अवधिः द्वादशवर्षाणि षण्मासानि पञ्चदशदिवसानि च आसन्। तस्मिन् दिवसे चतुष्षष्टिः इन्द्राः, लोकान्तिकदेवाः चापि समुपस्थिताः आसन्। सर्वे मिलित्वा भगवतः महावीरस्य कैवल्यमहोत्सवम् आचरितवन्तः। अनन्तरं देवैः समवसरणं रचितम्। देवैः भगवतः प्रवचनस्य प्रशंसा अपि कृता।

कैवल्यज्ञानस्य प्राप्त्यनन्तरम् ऋजुबालुका-नद्याः तटे भगवान् महावीरः प्रथमं प्रवचनं चकार। किन्तु प्रवचनं वने आसीत्, अतः जनाः गन्तुम् असमर्थाः आसन्। यद्यपि कैवल्यज्ञानानन्तरं प्रथमप्रवचने एव चतुर्विधसङ्घस्य स्थापना भवति स्म, किन्तु महावीरस्य प्रथमे प्रवचने जनाः एव नासन्। तेन सङ्घस्य स्थापना एव न जाता। इदमेकम् आश्चर्यं मन्यते। बहवः आचार्याः मन्यन्ते यत् - "प्रथमे प्रवचने जनाः आगतवन्तः आसन्, किन्तु केनचिदपि व्रतं न स्वीकृतम्।[5]

यदा भगवान् महावीरः चतुर्विधतीर्थस्य (साधुः, साध्वी, श्रावकः, श्राविकाश्च) स्थापनां चकार, तदा महावीरेण धार्मिकपरिवारस्य अपि रचना कृता।[6]

1. ११ गणधराः
2. ७०० केवलज्ञानिनः
3. ५०० मनःपर्यवज्ञानिनः
4. १,३०० अवधिज्ञानिनः
5. ७०० अवैक्रियलब्धिधारिणः

[2] https://hi.wikipedia.org/wiki/%E0%A4%AE%E0%A4%B9%E0%A4%BE%E0%A4%B5%E0%A5%80%E0%A4%B0

[3] Jain, Shanti Lal (1998), *ABC of Jainism*, Bhopal (M.P.): Jnanodaya Vidyapeeth, पृ॰ 51,

[4] Jain, Shanti Lal (1998), *ABC of Jainism*, Bhopal (M.P.): Jnanodaya Vidyapeeth, पृ॰ 51,

[5] तीर्थङ्कर चरित्र, मुनि सुमेरमल (लाडनूं) पृ. २१५

[6] तत्रैव

6. ३०० चतुर्दशपूर्विणः
7. ४०० चर्चावादिनः
8. १४,००० साधवः
9. ३६,००० साध्व्यः
10. १,५९,००० श्रावकाः
11. ३,१८,००० श्राविकाः

अयं भगवतः धार्मिकः परिवारः वर्तते। तेषु परिवारजनेषु त्रिचत्वारिंशत् गणधरेषु "गौतम-इन्द्रभूतिः" इत्याख्यः प्रथमः गणधरः आसीत्।

**एकादश गणधराः**

भगवतः महावीरस्य धार्मिकपरिवारे एकादश (११) गणधराः सन्ति [17] ते -

1. गौतम-इन्द्रभूतिः = अस्य ५०० शिष्याः आसन्। "आत्मनः अस्तित्वम्" मिति इन्द्रभूतेः शङ्का आसीत्।
2. अग्निभूतिः = अस्य ५०० शिष्याः आसन्। "पुरुषाद्वैतम्" इति अग्निभूतेः शङ्का आसीत्।
3. वायुभूतिः = अस्य ५०० शिष्याः आसन्। "तज्जीवं, तच्छरीरवादश्च" इति वायुभूतेः शङ्का आसीत्।
4. व्यक्तः = अस्य ५०० शिष्याः आसन्। "ब्रह्ममयं जगत्" इति व्यक्तस्य शङ्का आसीत्।
5. सुधर्मा = अस्य ५०० शिष्याः आसन्। "जन्मान्तरम्" इति सुधर्मणः शङ्का आसीत्।
6. मण्डितः = अस्य ३५० शिष्याः आसन्। "आत्मनः संसारित्वम्" इति मण्डितस्य शङ्का आसीत्।
7. मौर्यपुत्रः = अस्य ३५० शिष्याः आसन्। "देवः, देवलोकश्च" इति मौर्यपुत्रस्य शङ्का आसीत्।
8. अकम्पितः = अस्य ३०० शिष्याः आसन्। "नरकं, नारकीयः जीवश्च" इति अकम्पितस्य शङ्का आसीत्।
9. अचलभ्राता = अस्य ३०० शिष्याः आसन्। "पुण्यं, पापं च" इति अचलभ्रातुः शङ्का आसीत्।
10. मेतार्यः = अस्य ३०० शिष्याः आसन्। "पुनर्जन्म" इति मेतार्यस्य शङ्का आसीत्।
11. प्रभासः = अस्य ३०० शिष्याः आसन्। "मुक्तिः" इति प्रभासस्य शङ्का आसीत्।

जैनपदार्थमीमांसा

जैननये सप्तपदार्थाः [8] विवेचिताः, तेषां नामानि स्वरूपाणि उच्यन्ते। जीवः चेतनालक्षणः। आत्मशब्दवाच्यः, उपयोगरूपः। कर्ता, स्वदेहपरिमाणः, भोक्ता, संसारी, तथा स्वभावेन ऊर्धगमनयुक्तः अमूर्तश्च। द्विविधः सः संसारिमुक्तभेदात्।

धर्म अधर्मः अकाशः कालः पुद्गलाः अजीवाः । धर्मो गतिर्मुक्तेः साधनम्। अर्धर्मस्तद्विपरीतः। आकाश अनन्तः। कालः समयः। इमे निष्क्रियाः। पुद्गलो द्रव्यविशेषः रूपधारिणः सीमिता असीमिताश्च। शरीरवाङ्मनः प्राणापानयुक्ता।

कर्मपरमाणूनामात्मनि चलनमास्रवः। स च पुण्यपापागमद्वाररूपः द्विविधः, भावास्रव-द्रव्यास्रवभेदात्। मिथ्यात्व-अविरति-प्रमाद-कषाय-योगभेदेन पञ्चबन्धनस्य कारणानि । कर्मणामास्रवः भावास्रवप्रत्यायाः। पुद्गले कर्मणां विकासः द्रव्यास्रवः।

कर्मफलभोगार्थं बन्धः भावबन्धद्रव्यबन्धभेदात् द्विविधः। यत्र रागद्वेषमोहादिभिः कर्मबन्धनं तत्र भावबन्धः, कर्मपुद्गलानामात्मप्रदेशे सम्बन्धः द्रव्यबन्धः, अत्र आत्मपुद्गलयोः सम्बन्धः वर्तते। आस्रवनिरोधलक्षणः सम्बरः। भवप्रवाहं संवरयति नाम निरोधयतीति संवरः । आस्रवः योगेन सम्बरो वियोगेन भवति। मनोवाक्कायकर्मणां निरोधो गुप्तिः। इयं संवरस्य मूलकारणम्।

अर्जितकर्मफलस्तपःप्रभावैर्निर्जरणं नाम दूरीकरणं निर्जरः, अविपाकसविपाकभेदेन द्विविधः। तपसः प्रभावेण अर्जितकर्मफलस्य भोगं विना

[7] तीर्थङ्कर चरित्र, मुनि सुमेरमल (लाडनूं) पृ. २१८

[8] तत्त्वार्थसूत्रम् ४

दूरीकरणमविपाकः। स्वाभाविकतया कर्मफलभोगानन्तरमप्रवृत्तिः सविपाकः। कृत्स्नकर्मविप्रमोक्षो मोक्षः। सम्यग्ज्ञानचारित्राणि मोक्षमार्गः। कर्मबन्धनबद्धः एवात्मा यदा गुरूपदेशात् अभ्यासात् स्वसंवित्तेश्च स्वपरान्तरं विजानाति तदा मोक्षाभिमुखो भवति। तदानीं पूर्वसंचितकर्मावरणक्षयो मोक्षः।

तत्र सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः।[9] मोक्षसाधनोपकारकं रत्नत्रयम्।

सम्यग्दर्शनम् तत्त्वार्थश्रद्धानम्। तत्त्वं वस्तु, अर्थाः जीवादिपदार्थाः सर्वेषां श्रद्धाकरणम् सम्यग्दर्शनम्। स्वभावाद् गुरूपदेशाद्वा आविर्भवति तत्। तत्त्वानि सप्त, जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षाः।

सम्यग्ज्ञानम् मोक्षमार्गस्य द्वितीयसोपानम्। तज्ज्ञानं मति-श्रुत-अवधि-मनःपर्यय-केवलानि पञ्च। पञ्चज्ञानं प्रमाणम्। परोक्ष-प्रत्यक्षभेदात् तद्विविधम्।

सम्यक्चारित्रम् तृतीयसोपानम् । तत्र सम्यक्पदमौपशमिकम्। औपशमिकः सम्यक्यत्वं। औपशमिकं चारित्रम्। Right belief and conduct




## प्रत्यक्षम्

जैनमते प्रत्यक्षं द्विविधं सांव्यवहारिकं पारमार्थिकभेदात्। स्वस्य उत्पत्तौ आत्मव्यापारापेक्षं पारमार्थिकमिति यशोविजयमतम्। यज्ज्ञानं साकल्येन स्पष्टं तत्पारमार्थिकम्। मनः इन्द्रिययोः सहायतां विना यः पदार्थं स्पष्टं विजानाति तत्तु पारमार्थिकप्रत्यक्षमिति स्पष्टार्थः। पारमार्थिकप्रत्यक्षं त्रिविधम् अवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानं च। तत्राद्यं रूपिद्रव्यस्य अवभासकं आत्मव्यापारापेक्षम् अवधिज्ञानम्। तत् षड्विधम्। अनुगामि-अननुगामि-वर्द्धमान-हीनमान-प्रतिपाति-अप्रतिपातिभेदात्। भास्करप्रकाशवत् उत्पत्तिक्षेत्रादन्यत्र दृश्यमाणम् अनुगामकं वा अनुगामिकम्। यथा सूर्यः पूर्वतः पश्चिमपर्यन्तं प्रकाशयन् स्वतः गच्छति तथैव अवधिज्ञानं पुरुषे एकस्थानात् अन्यस्थानपर्यन्तं जाग्रति। उपत्तिस्थाने हि केवलं यः विषयमवबोधयति अन्यत्र न तदेव अननुगामिकम्। प्रश्नादेशपुरुषवत्। यथा प्रश्नादेशपुरुषः एकस्मिन् स्थाने प्रश्नोत्तरदातुं शक्नोति अन्यत्र न तथैव अननुगामिकम्। यज्ज्ञानं जायमानक्षेत्राद् क्रमशः बर्द्धमानं गच्छति तदेव वर्धमानम्। यथा अरणिसम्भूताग्नौ इन्धनसंयोगेन अग्निः वर्धति तथा अवधिज्ञानं शुभ-अध्यवसायेन पूर्वोत्पन्नं वर्धत इति। उत्पत्तिक्षेत्रापेक्षया यत्तु क्रमेण अल्पीभवति तदेव हीनमानम्। यथा ज्वलनशीलाद् वह्नौ काष्ठापसारणेन अग्नेः ज्वलनं नश्यति तथा हीनमान अवधिज्ञानम्। उत्पत्तेः पश्चात् यज्ज्ञानं स्वतः नश्यति तदेव प्रतिपाति अवधिज्ञानम्। जलतरंगवत्। यथा जलतरंगा उत्पतेरनन्तरं स्वयं नश्यन्ति तथा इदमपि। आमरणात् अवतिष्ठमानं अप्रतिपाति, वेदवत्। जा विकलपारमार्थिकं सकलपारमार्थिकञ्च।[10]

## श्रुतज्ञानस्य चतुर्दशभेदाः

तत्र सांव्यवहारिकप्रत्यक्षं द्विविधम् इन्द्रियजम् अनिन्द्रियजं च। उभयमपि मतिज्ञान-श्रुतज्ञानभेदेन द्विधा विभज्यते। इन्द्रियमनोनिमित्तं श्रुतानुसारि ज्ञानं श्रुतज्ञानम्। श्रुतानुसारित्वं च संकेतविषयम् अथवा श्रुतग्रन्थानुसृत्य वाच्यवाचकभावेन अन्तर्जल्पाकरत्वम्। इदं श्रुतज्ञानं पुनः चतुर्दशधा विभज्यते। अक्षर-अनक्षर-संज्ञि-असंज्ञि-सम्यक्-मिथ्या-सादि-अनादि-सपर्यवसित-अपर्यवसित-गमिकश्रुत-अगमिकश्रुत-अंगप्रविष्टश्रुत-अनंगप्रविष्टश्रुतभेदेन। आद्यम् अक्षरश्रुतं पुनः संज्ञाक्षर-व्यंजनाक्षर-लब्ध्यक्षरभेदेन त्रिधा विभक्तम्। बहुविधलिपिसंयुक्तं संज्ञाक्षरश्रुतम्। अकारादिकं

[9] तत्त्वार्थसूत्रम् १

[10] जैनतर्कभाषा

भाष्यमाणं व्यंजनाक्षरश्रुतम्। इन्द्रियमनोयोगेन श्रुतज्ञानस्य उपयोगः लब्ध्यक्षरश्रुतम्। यद्वा श्रुतज्ञानावरणस्य क्षयोपशमो हि लब्ध्यक्षरश्रुतमिति। अनक्षरश्रुतं निःश्वास-उच्छ्वासादिकम्, भावश्रुतत्वात्। अत्र आत्मनः व्यापार उक्तः। संज्ञी अर्थात् समनस्कजीवानां यज्ज्ञानं तत्तु संज्ञिश्रुतम्। तद्विपरीतानाम् असंज्ञिश्रुतम्। आचारांगादि अंगप्रविष्टानां दशवैतालिकानां बाह्यानां कृते सम्यक्श्रुतम्। लोकिकागमयुक्तं वा अनाप्तप्रणीतं मिथ्याश्रुतम्। द्रव्यत एकपुरुषादिकं, क्षेत्रत भरतैरावते, कालत उत्सर्पिण्यवसर्पिण्यौ, भावतश्च देवदत्त-प्रभुदत्तादीनां प्रयत्नानि सादिश्रुतानि भवन्ति। विपरीतं तु अनादिश्रुतम्। यत्र द्रव्य-क्षेत्र-काल-भावसम्बन्धापेक्षाभिः सादिश्रुतं तत्र सपर्यवसितं यत्र अनादि तत्र अपर्यवसितमिति। यत्र सदृशपाठं दृष्टिवादगतं तत् गमिकम्। असदृशपाठमगमिकश्रुतम् कालिकमित्युच्यते। गणधररचितश्रुतम् अंगप्रविष्टम्। अनंगप्रविष्टं तु स्थविरकृतम्। अनेन सप्रभेदं सांव्यवहारिकं चतुर्दशधा श्रुतज्ञानस्य भेदा उक्ताः।[11]

**अर्थावग्रहनिरूपणम्**

रूप-नाम-जाति-कर्म-गुण-द्रव्य-कल्पनादिभिर्वर्जितस्य सामान्यज्ञानस्य प्राप्ति अर्थावग्रह उच्यते। यस्मिन् ज्ञाने सामान्यमात्रस्य प्रतीतिर्भवति, किंतु किं रूपं, किं नाम, का जातिः, किं कर्म, को गुणः, किं च द्रव्यमिति विशेषप्रतीतिर्नैव जायते तदेव ज्ञानम् अर्थावग्रह इति जैनाः स्वीकुर्वन्ति।

संशयः- यदि अर्थग्रहणं शब्दयोग्यं न भासते, किन्तु सामान्यं प्रतीयते तर्हि नन्दिसूत्रे अर्थग्रहणानुकरणेन शब्दः स्वीक्रियते इति कथनं कथं प्रासंगिकं स्यात्? वचनहीनत्वात्।

समाधानम्- सः वचनं प्राप्तवान्, अत्र वचनं वक्तुः कृते उक्तम्। ज्ञाता न जानाति शब्दो विद्यते न वेति रूपरसादिसम्बन्धवर्जितेन। यः शब्दं गृहणाति, सः शब्दं प्रतीयते इति न जानाति इत्यर्थः। अतः सूत्रकृद्भिः वचनं सिद्धं जातम्। यदि एषः शब्दः, तादृशः प्रयासः ग्रहणे कल्प्यते, तर्हि शब्दोल्लेखः अन्तःक्षण इव प्रतिभाति। अतः शब्दार्थविग्रहकालः अपि व्यत्यस्य भविष्यति। एवं सति सर्वदा न भविष्यति।

शंका -शब्दोऽयम् अत्र सामान्य-विशेषयोः ग्रहणम् अपि अर्थावग्रहो ग्रहीतव्यम्। तदनन्तरं शङ्खशब्दस्य माधुर्यादिधर्माः ज्ञायन्ते। श्रृङ्गशब्दस्य कर्कशादिकं न, एवमत्र ईहा जायते।

समाधानम्- तन्न। अयं शब्दः, एतादृशं ज्ञानम् अशब्दव्यावृत्तौ उत्पद्यते, अतः विशेषस्य ज्ञानं भवति अपायः। यदि किञ्चित् विशेषं दृश्यते तर्हि न अपायो भवितव्यः। अतः अग्रे ज्ञानस्य तुलनायां पूर्वज्ञानं सर्वं कतिपयविशेषेभ्यः ज्ञायते। अर्थावग्रहात् पूर्वं व्यंजनावग्रहस्य कालो जायते। अत्र अर्थप्रतीतेरभावः शून्यो वोच्यते।[12]

उपसंहारः-

जैनदर्शनं सर्वप्राचीनम्। अत्र न केवलं दार्शनिकतत्त्वानां ज्ञानात्मकविचारः प्रस्तूयते अपितु सामाजिक-सांस्कृतिकविचारस्य श्रेष्ठतापि विचार्यते। ज्ञानविचारक्षेत्रे जैनदर्शनं स्वकीयं महत्त्वपूर्णः विचारः प्रस्तूतीकृतः। भारतीयसंस्कृतिः अहिंसायां विश्वासं करोति। हिंसां अधोपतनं करोति। जैनधर्मः अस्याः अहिंसायाः भावनायाः प्रथमः प्रचारकः अस्ति। लोके बहवः जीवाः सन्ति आत्मा सर्वेषु वर्तते, सर्वेषां ईश्वरप्राप्त्यर्थं सामर्थ्यम् अस्ति। अतः तेषां कृते हिंसा न कर्तव्या। जैनसंप्रदायः निर्जीववस्तूनि अपि हिंसां निषिद्धं करोति, अहिंसा परमोधर्मः इति विचारयति।

सन्दर्भ **सूची**

1. तत्त्वार्थसूत्रम्
2. जैनतर्कभाषा
3. न्यायकुमुदः

---

11 तत्र

12 तत्रैव

4. जैनदर्शनशासनधारा
5. जैनसिद्धान्तप्रवेशिका
6. षड्दर्शनसमुच्चयः
7. सर्वदर्शनसंग्रहः